संस्कृत

क्र.नं. १०६

स्तोत्र

महिम्न (सटीक व भाषांतर)

७९०। स्तो. १८५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥ अथसटीकमहिम्नप्रारंभः ॥

(2)



Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan

(2A)

श्रीगणेशायनमः॥ हेभगवन् तेतवमहिम्नः परंपारंअविदुषःअजानतःपुरुषस्यस्तुतिर्यदिःअसदृशीस्यात् अननुरूपाअयोग्याभवेत् तर्हिकिंचित्रं तथाब्रम्हादीनामपिगिरस्त्वयिविषयेअवसन्नाः निष्फलाः भवेयुः तत्तस्मात्कारणान्न केवल मस्माक मेवस्तुतेरनधिकारित्वंकिंतुब्रंम्हादीनामपितथैवस्यादित्यर्थः सर्वेषामेव अनेन पूर्वार्द्धेनस्तुतेरनधिकारित्वं प्रतिपादितं उत्तरार्द्धेन साधिकार त्व प्रति पादयन्नाह हे भगवन् यतःस

महिम्नःपारंतेपरमविदुषोयद्यसदृशीस्तुतिर्ब्रम्हादीनामपितदवस
न्नास्त्वयिगिरः अथाऽवाच्यःसर्वःस्वमतिपरिणामावधिगृणन्ममाऽ
प्येषःस्तोत्रेहरनिरपवादःपरिकरः॥१॥

र्वःसमस्तोपिजनःस्वमतिपरिणामावधिस्वकीयामतिःस्वमतिः तस्याःपरिणामःपरिपाकःसोऽवधिःसीमामर्यादायत्रस्वमतिपरिणामावधियथाभवति एवंगृणन् स्तुवन् अवाच्योऽनुग्राह्योभवतिनिर्दोष एवायंयदेवं तर्हिहेहरहे दीनार्त्तिहरअस्मिन्स्तोत्रेममापिएषःपरिकरःप्रारंभोनिरपवादोनिर्दोषएवेत्यर्थः॥१॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

महि॰ सटी॰
१
(3)

हे भगवन् यस्तव महिमा वाङ्मनसयोः पंथानं अतीत एवलंघितवान् मार्गमतिक्रांतः वाक्च मनश्च वाङ्मनसी तयोर्वाङ्मनसयोः एतेच किल वाङ्मनसी सर्वार्थविषयिणी ताभ्यामपि तव महिमा अवधारयितुं परिज्ञातुं नशक्यते न प्रत्यक्षेण अनुमानेन गृह्यते सः कः यत्तव महिमानं श्रुतिरपि वेदोपि चकितं अभिधत्ते भीतंभीतं ब्रूते न निश्चयतः कया अतद्व्यावृत्त्या न तत् अतत् अतद्रूपाचासौ व्यावृत्तिश्च अतद्व्यावृत्त्या सइत्थंभूतो महिमा कस्य स्तोतव्यः अपितु न कस्यापीत्यर्थः तथा कतिविध गुणस्तस्य भगवतः कियंतो गुणाः तत्परिज्ञातुं नशक्यते कस्य

अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि, स कस्य
स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥ ७

विषयः कस्य गोचरो भवेत् अपितु न कस्यापीत्यर्थः एतेन निष्कलं स्वरूपेण स्तुतेरनधिकारित्वं प्रतिपादितं सकले सावकाशत्वं अस्तीति प्रतिपादयन्नाह पुनः अर्वाचीने सृष्टिस्थितिलयप्रमुखव्यतया आत्मन्यनुग्राहके पदे स्थाने तु कस्य मनः न पतति वचो वाक् कस्य न प्रसरति अपितु सर्वेषामपि मनोवचश्च प्रसरत्येवेत्यर्थः ॥२॥ ७ ७ ७ १

(3A)

भावतः अशेषशास्त्र कर्तृत्व प्रतिपादनाय आत्मनः श्रौद्धत्यपरिहाराय स्तवम् आह मध्विति हे भगवन् मम स्तुत्या
तव तुष्टिर्नास्त्येव किं कुर्वतस्तव वाचो गिरो यैर्निर्मिता वतः सृष्टवतः कथंभूताः वाचः मधु स्फीताः मधुवत् स्फीताः कोम
लाः माधुर्य गुणयुक्ताः सालंकारा इत्यर्थः पुनः कथंभूताः परमं अमृतं परमामृत स्वरूपास्तथोच्यंते उपचारा हृदांतसि
द्धांतनिष्ठाः एतेन किमुक्तं एवं विधाः स्वर्गापवर्गयोर्निष्ठा वाचो गिरो निर्मित वतः सुरगुरोरपि वाक् किंतु विस्मयपदं-

मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् मम
त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन्पुरमथन बुद्धिर्व्यवसिता ३ ७

न भवति आश्चर्य स्थानं न भवति अपितु भवतीत्यर्थः किंपुनरस्मदादेः अहो यद्येवं तर्हि किमर्थं स्तौषि प्रवर्त्तसे सत्यं
तु पुनः हे पुरमथन त्रिपुरदहन अस्मिन् स्तुति लक्षणे ऽर्थे मम बुद्धिरिति कारणात् व्यवसिता स्तौमि इति किं अहं-
भगवतो गुण कथन पुण्येन एतां आत्मीयां वाणीं पुनामि पवित्रीकरोमीत्यर्थः ॥३ ७ ७ ७
॥ ७ ७ ७ ७ ७ ७ ७ ७ ७

Joint project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(4)

आत्मनस्तु तेः सावकाशत्वं अव्यभिचारित्वं प्रतिपाद्य इदानीं सर्वज्ञत्वं सर्वकर्तृत्वं प्रतिकेचिदिह्यप्रतिपद्यंते मीमांसकादयस्तन्मतनिराकरणाय अनवद्यप्रमाणेनोपमन्या सपरेण श्लोकत्रयेण भगवंतं स्तुवन्नाह हे भगवन् हे वरद यतस्तवैश्वर्यं तद्यस्तं निक्षिप्तं आरोपितं च कासु तिसृषु तनुषु कथंभूतासु गुणभिन्नासु गुणाः सत्वरजस्तमांसि तैर्भिन्नाः पृथक् भूताः गुणभिन्नास्तासु कथंभूतं तत् ऐश्वर्यं जगदुदयरक्षाप्रलयकृत् त्रयाणां जगतां उदयः उत्प

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु
अभव्यानामस्मिन्वरद रमणीयामरमणीं विहंतुं व्याक्रोशीं विदधत इहैके जडधियः ४

त्तिः रक्षा परिपालनं प्रलयो विनाश

श्चेति भगवतस्तवैश्वर्यं करोति पुनः कथंभूतं त्रयीवस्तु त्रयी शब्देन वेदत्रयी अथवा ब्रह्मविष्णुरुद्रात्मकं रूपं हे भगवन् इह मर्त्यलोके जडधियो मंदमतयः पापिष्ठा मीमांसकादयस्तवैश्वर्यं विहंतुं स्फोटयितुं निराकर्तुं व्याक्रोशीं निंदां विदधते कुर्वंति कथंभूतां व्याक्रोशीं अभव्यानां पापिष्ठानां रमणीयां मनोरमां पुनः कथंभूतां अस्मिन् सर्वज्ञत्वादि २
गुणोपेते तवैश्वर्ये शब्दमतीनां पंडितानां अरमणीं अमनोरमाम् ४ ॥ ॥ ॥ ॥ ॥ ॥

(5A)

इदानींतामेवव्याक्रोशींप्रकटयन्नाहखल्विति निश्चितं सःधातासःकर्तात्रिभुवनंसृजतित्रिभुवनजनने काईहाकृ
चेष्टाकापरिस्पंदक्रियातथाकिंकायःसन् त्रिभुवनंसृजतितथाकिमुपायःसःधाताकिमुपायःसन् त्रिभुवनं सृजति
किमुपादानं किंकारणं किंनिमित्तं अथमिति कुतर्कः कांश्चिद्धतधियोमंदमतीन् मुरवरयति वाचालयति किमर्थं ज
गतो मोहाय लोकमतारणाय नरकगमनाय कथंभूतः कुतर्कः त्वयिविषये अनवसरदुःस्थः अवसरो अवकाशः

किमीहःकिंकायःसखलुकिमुपायस्त्रिभुवनंकिमाधारोधातासृजतिकिमुपादा
नइतिच अतर्क्यैश्वर्येत्वय्यनवसरदुःस्थोहतधियःकुतर्कोऽयंकांश्चिन्मुरवरय
तिमोहायजगतः ॥५॥

न अवसरस्तेनदुःस्थः दुर्बलस्तच्छइत्यर्थः कथंभूते त्वयिअतर्क्यैश्वर्येअचिंत्य महत्वे यतउक्तं इच्छयाकुरुते
देहमिच्छयावितनुर्भवेत् क्रीडते भगवान लोके बालः क्रीडनकैरिव ५ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

महि. हे भगवन् अमीभूर्भुवःस्वः मभृतयः सप्तलोकाः अवयववंतोपि किंअजन्मानः एषांजन्मनविद्यते यत्सावयवंतन्न सटी.
३ जन्म युक्तं यथाघटः तथालोकाः सावयवाः सावयवत्वाज्जन्मवंत एव हे भगवन् भवविधिः सृष्टिविधिः सृष्टिविधा
नं जगतां अधिष्ठातारंचेतननिमित्तं कारणमीश्वरं अनादृत्य भवति किं अनपेक्ष्य भवति नैवकर्त्तारमपेक्षते ए
(5) वं दिक्कालधर्माधर्म परमाणुमभृतानिचेतनाधिष्ठान स्वीकृतानि स्वकार्योत्पत्तौ मवर्त्तंते यच्चेतनाशून्यानि तच्चे

अजन्मानो लोकाः किमवयववंतोऽपि जगतामधिष्ठातारं किं भववि
धिरनादृत्य भवति अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो
मंदास्त्वां मत्यमरवर संशेरत इमे ६ ६ ६ ६ ६

तनाधिष्ठानस्वीकृतकार्योत्पत्तौ मवर्त्तंते अथवाभिधीयते यदि अनीशः कुर्यात् तत्तन्महैश्वर्य बहिर्भूतः कश्चित्
कुर्यात् तदाऽस्य अनीशस्य भुवनजनने भुवनोत्पादनविधौ कः परिकरः कासामग्री हे अमरवर यतः कारणा २
दिमे मंदाः पापिष्ठाः मीमांसकादयः त्वांप्रति संशेरते संदेहं कुर्वंति संप्रति संदेहो नास्तीति तात्पर्यार्थः ईश्वरं विना नान्यः स
मर्थः इत्यर्थः ६

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai. "

(5A)

त्रयीवेदविहितोमार्गः सांख्यं कापिलंशास्त्रं पंचविंशति तत्त्वोपलक्षितं वातथायोग संबंधः योगः पातंजलात् साधन
त्वात् न्यायशास्त्रंवैशेषिकशास्त्रं तथापशुपतिमतं शैवागममतेनसिद्धांतः एकोमार्गः तथावैष्णवंनारद पंचरात्रागमम
तेन सिद्धांतः एकोमार्गः इत्यनेनप्रकारेणप्रस्थाने मार्गेप्रभिन्ने नानात्वं गतेसतिअहंकारोपेतास्तदनुयायिनः इ
तिब्रुवते इदं परंतत्त्वंनास्मात्परमस्तीतिअदः पथ्यंसेव्यं ग्राह्यंच तस्मात्सेवनीयमस्ति इत्येवंप्रकारेण रुचीनांइच्छा

त्रयीसांख्यंयोगःपशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदःपथ्यमितिच रुची
नांवैचित्र्यादृजुकुटिलनानापथजुषांनृणामेकोगम्य स्त्वमसिपयसामर्णवइव ७

नांवैचित्र्यात् भिन्नत्वात् अतोरुचयोविचित्राः यदुक्तं एकमेव परंतत्त्वमभिन्नं परमार्थतः तदेव रुचिवैचित्र्यान्नानात्वं समुपा
गतं हेभगवन् ऋजुकुटिलनानापथजुषां त्वमेव एकः गम्यः केषांकइवपयसां अर्णवः समुद्रोयथागम्यस्तथात्वंयथाइवार्थे
७

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

अहोहे वरद तवइयत्‌ इदंतंत्रोप करणं तंत्ररूपेण मपंचरूपेण स्थित मुपकरण मुपकारक मित्यर्थः महां श्चास 
वुक्षाचेति महोक्षः खट्वांगम्‌ पसिद्धमेव दंडस्योपरि ब्रम्ह कपाले खट्वांग मुच्यते तथापरशुरायुधविशेषः अजिनंग
जचर्म तथाभस्म दग्धगोमयं फणिनः काद्रवेयाः नागाः तथाकपालं शिरोस्थिच इतिशब्दः समासोक्तराः इंद्रादयो
दिवाः भवद्भ्रूपणिहितां भ्रूक्षेप मात्रेण नितरां दत्तां इत्यर्थः ऋद्धिंसंपदं विदधति धारयंति अहोयद्येवं तर्हि कथंस्वयं

(८)

महोक्षःखट्वांगंपरशुरजिनं भस्मफणिनःकपालंचेतीयत्तव वरदतंत्रोपकरणम्‌ सुरा-
स्तांतामृद्धिं विदधति भवद्भ्रूप्रणिहितां नहिस्वात्मारामंविषयमृग तृष्णा भ्रमयति ८

न भुंक्ते नचैवं वाच्यंहि यस्मात्‌ कारणात्‌ विषय मृग तृष्णास्वात्मारामं पुरुषं योगिनं नाभ्रमयति नचाडयति एते ५
न भगवतः परम योगित्वं प्रकाशितम्‌ ८ ५ ५ ५ ५ ५

(6A)

हे पुरमथन त्रिपुरदाहक कश्चिदव दर्शनानुयायि सर्वमिदं जगत् ध्रुवं नित्यं गदति न कदाचिदनीदृशं जगदिति अचिन
श्वरं कथयति अथ अपरो बौद्धः सकलं जगदिदं अध्रुवं क्षणिकं गदति परस्तु तोन्यः वीतरागी माध्यस्थः एतस्मि
न् समस्तेऽपि जगति ध्रौव्याध्रौव्ये नित्यानित्यत्वे व्यस्त विषये निक्षिप्त प्रमाणे वदति आकाशादि पंचकं नित्यं घ

ध्रुवं कश्चित्सर्वं सकलमपरस्त्व ध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ९

टपटादिकमनित्यम् इति ब्रूते इत्यर्थः एवं नानाप्रकारैस्तैर्वादिभिर्विस्मित इव मोहं प्राप्त इवाहं त्वां स्तुवन् जि
ह्रे निलज्जो अहो यद्यवं तर्हि किमर्थं स्तुतौ प्रवर्त्तसे तत्राह ननु अहो खलु निश्चये न मुखरता वाचालता न
धृष्टा अपि तु धृष्टैवेत्यर्थः ९

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

हे भगवन् विरिंचो ब्रम्हा उपरित नपक्षे हरिः कृष्णः अधःपक्षेत तवैश्वर्यं यत्नात् परिच्छेत्तुं एतावद्धीति निश्चेतुं अ
नलं यातौ असमर्थौ भूतौ कथंभूतस्य तवअनलस्कंध वपुषः अनलस्कंधो ऽग्निसमूहः वपुः शरीरं यस्यतव कचि
दनिलस्कंध इति पाठस्तत्र वायुशरीरस्य एतेन किमुक्तं वायुतत्व पर्यंतं लिंगस्य मस्तकं कालाग्निपर्यंतं लिंगस्य
मूलंब्रम्हा ब्रम्हांड व्यापी विष्णुर्भगवान् अप्तत्वनिवासी कथमेतौ तवैश्वर्यं परिज्ञातुं समर्थौ स्यातामितिअ

तवैश्वर्यंयत्नाद्यदुपरिविरिंचोहरिरधःपरिच्छेत्तुंयातावनलमनलस्कंधवपुषःततोभक्ति
श्रद्धाभरगुरुगृणभ्द्यांगिरिशयत्स्वयंतस्थेताभ्यांतवकिमनुवृत्तिर्नफलति ॥ १० ॥

पितुनभवतः-
इत्यर्थः ततोनंतरं ताभ्यांब्रम्हविष्णुभ्यां तवैश्वर्यं स्वयंतस्थे स्वेनैव प्रकाशितमित्यर्थः आत्मानं आत्मनैव प्रकट
यामास किंकुर्वभ्द्यां ताभ्यां भक्तिश्रद्धा भरगुरुगृणभ्द्यां भक्तिर्भजनं श्रद्धा विश्वासः तयोर्भरेण महत्वे गुरूयथा
भवति एवंगृणभ्द्यां स्तुवभ्द्यां ताभ्यामित्यत्रनादर्थ्ये चतुर्थी यद्यस्मात् कारणात् हे गिरिशतव अनुवृत्तिः
सेवा किंन फलति अपितु फलत्येवेत्यर्थः १० ६ ६ ६ ६



A project of the Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(७अ)

हे त्रिपुरहर दशास्यो रावणोयत्नात् अनायासेन त्रिभुवनं त्रिलोकं अवैरव्यतिकरं शत्रुसंपर्करहितं आपाद्य संपाद्य कृत्वा रणकंडूपरवशान् रणेकंडूः खर्ज्जूः तयापरवशान् तदधीनान् युद्धलंपटानित्यर्थः बाहून् अभृत धृतवान् इतियत् तदिदं स्थिरायास्त्वद्भक्तेर्विस्फूर्जितं विलसितं कथंभूतायास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचर

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्योयद्बाहूनभृतरण-
कंडूपरवशान् शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः स्थि-
रायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जितमिदम् ॥ ११ ॥ ७ ७

णांभोरुहबलेः शिरांस्येवपद्मानि पद्मानितेषां श्रेणीपंक्तिः तयारचिता निर्मिता चरणांभोरुहयोः पादपद्मयोर्बलिः पूजोपहारो यस्यां तस्याः त्वयिभक्तेः फलंनिरूपितं ७ ७ ७ ७ ७ ७

महि- स्टी.
६

इदानींत्वयितिरस्कार फलं निरूपइतुमाह अमुष्येति अमुष्य रावणस्य पाताले रसातले ऽपि प्रतिष्ठास्थि
तिः अलभ्या दुर्लभा आसीत् किंभूतस्य भुजवनं भुजसमूहं बलात् शक्त्या त्वदधिवसतो तवनिवासस्थाने
कैलासे विक्रमयतः किंभूतं भुजवनं त्वत्सेवासमधिगतसारं त्वत्सेवया भवदाराधनेनसमधिगतः प्राप्तः सारो
बलं येन तत्तथोक्तं कस्मिन् सतित्वयि अलसचलितांगुष्ठशिरसिमति अलसेन अनायासेन अप्रयत्नेनचलितं (8)

अमुष्यत्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेपित्वदधिवसतौविक्रमयतः ।
अलभ्यापातालेप्य लसचलितांगुष्ठशिरसिप्रतिष्ठात्वय्यासीद्ध्रुवमुपचितोमुह्यतिखलः
१२

अधः कृतं अंगुष्ठशिरोयेनसो ऽलसचलितांगुष्ठशिरास्तस्मिन् सति अहोयुक्तमेतत् ध्रुवंनिश्चितं उपचितः ६
परया लक्ष्म्या संपन्नः समृद्धः खलः दुर्जनः मुह्यति मोहमुपगच्छति १२ ५ ५ ५

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(8 A)

इदानीं बाणासुरानुग्राहिणं भवंस्तवन्नाह यतू इति बाणो बाणासुरः सुत्राम्णो वासवस्य ऋद्धिं संपदं सुरें-
द्रत्वं अध श्चक्रे कथंभूतां ऋद्धिं परमोच्चैरपिसतीं अत्यंत महतीमपि हे भगवन् युक्त मेतत् तस्मिन् बाणेतच्चित्रं
आश्चर्यं नभवति कथंभूतो बाणः परिजनविधेयत्रिभुवनः परिजनस्येवसेवकस्येव विधेयं वश्यं त्रिभुवनं यस्य

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपिसतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः नत
च्चित्रं तस्मिन्वरिवसितरित्वच्चरणयोर्न कस्याऽप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः १३

स्तयोक्तः कथंभूते तस्मिन् तवचरणयोर्वरिवसितरि तव शुश्रूषके युक्तमेतदित्याह हेवरद त्वयि शिरसः अ
वनतिः प्रणामः कस्याऽपिउन्नत्यैनभवति अपितुसर्वेषामेव ऐश्वर्यदात्री भवतीति तात्पर्यार्थः १३ ६ ६

अकाडेति हे त्रिनयन विषं कालकूटं संहृतवतः गिळितवतस्तव कंठगळे यः कल्माषः कृष्णपांडुरो वर्णः आ
सीत् सः श्रियं शोभां नुइतिवितर्केन कुरुते अपितु करोत्येव कथंभूतस्य तव अकांडब्रम्हांडक्षयचकित देवा
८ स्कर रूपाविधेयस्य अकांडे अप्रस्तावे ब्रम्हांडक्षयेन जगत्प्रलयेन चकिताः येदेवास्कंरास्तेषु रूपाविधेयायय-
स्यतत् रूपापरस्य ननु शंभु स्फटिकसंकाशे नील स्य लक्षणविकारः कथं शोभां कुरुते इत्याह अहोयुक्तमेतत्

अकांडब्रम्हांडक्षयचकितदेवासुर रूपाविधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः
सकल्माषः कंठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः॥१४

भुवन भयभंग व्यसनिनः पुरुषस्य विकारोपि श्लाघ्यः १४ ५ ५ ५ ५ ५ ७

Joint project of the Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan ... Mumbai.

(9A)

असिद्धार्थाइति हे भगवन् यस्य स्मरस्य विशिखाः बाणाः सदेवासुरनरे देवाश्च असुराश्च नराश्चतैः सहव
र्त्तत इति सदेवासुरनरं तस्मिन् जगति लोके स्वर्ग मृत्यु पाताले ऽपीत्यर्थः असिद्धार्थाः अकृत कार्याः क्व चि
दपि नैव निवर्त्तंते किंतु कृतकार्या भवंतीत्यर्थः किंभूतस्य स्मरस्य नित्यं जयिनः जयशीलस्य हे ईश सः स्मरस्त्वा

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्त्तंते नित्यं जगति जयिनो यस्य विशिखाः स
पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः १५

मितर सुर साधारणं अन्यदेव तुल्यं पश्यन् स्मर्तव्यात्मा अभूत स्मरणीय शरीरो बभूव तथा न दृष्ट इत्यर्थः कथंभू
ता विशिखाः जयिनो जययुक्ताः हि युक्तमेतत् वशिषु जितेंद्रियेषु परिभवोऽनादरः न पथ्यः न सुखकारी इत्यर्थः १५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(१०)

महीपादेति हे भगवन् त्वं जगद्रक्षाय जगतां रक्षणाय रक्षसां मतारणायनरसिनृत्यसितांडवंकरोषिम ह पृ
थ्वीपादाघातात् पादताडनात् चरणविन्यासात् सहसाशीघ्रंकिमुपर्यातिकिमधः मविशतीतिसंशयपदं व्रजति-
अस्तिनास्तीति संदेहं गच्छतीत्यर्थः तथाविष्णोः पदमाकाशंभ्राम्य द्भुजपरिघरुग्ण ग्रहगणंअभूत् भ्राम्यद्भिर्भु
जरूपपरिघैः भुजस्थैःपरिघैर्वारुग्णो भग्नो ग्रहगणः सोमपात्र समूहोयत्र तत्तथा यागादि शुभकर्माणि यदाध्वस्यंत



महीपादाघाताद्व्रजतिसहसासंशयपदं पदंविष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् मु॰
हुर्द्यौर्दौस्थ्यंयात्यनिभृतजटाताडिततटा जगद्रक्षायैत्वंनटसिननुवामैवविभुता १६

इत्यर्थः भ्राम्यद्भुज महारेण भग्नग्रहगण समूहो वर्त्तते तथा द्यौः स्वर्गः मुहुः वारंवारं दौस्थ्यं याति दुस्थत्वं यातिकथं
भूता द्यौः अनिभृतजटा ताडित तटा अनिभृताः असंवृताः याः जटास्ताभिस्ताडितं तटं प्रांतदेशो यस्याः सातथोक्ता ८
ननु अहोयुक्तमेतत् यतोविभोः विभुता मभुता वामैवत्रैपरीत्यं विभुत्वं कचिद्भवतीत्यर्थः १६

(10A)

वियद्व्यापीति हे भगवन् वारांतोयानां प्रवाहः ओघः यः सः तेतव शिरसि पृषतलघुदृष्टः जलकणिकावत्सूक्ष्मो दृष्टः-
कथंभूतो वियद्व्यापी व्योमवत् व्यापनशीलः पुनः किंभूतः तारागणगुणितफेनोद्गमरुचिः ताराः नक्षत्राणि ते
षां समूहस्तेन गुणिता उपमिलिता शंकिते तियावत् फेनोद्गमस्य डिंडिरोत्पत्तेः रुचिः शोभा यस्य सः तेन प्रवाहेन ज

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते
जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः १७

गत् द्वीपाकारं कृतं जलमध्यस्थितो भूखंडो द्वीपः तद्रूपमकारि किंविधं जलधिवलयं जलधिः समुद्रो वलयः प
रिवायस्य तत् अनेनैव हेतुना तव दिव्यं सदानंदात्मकं वपुः शरीरं धृतमहिमेत्युन्नेयं ऊहनीयं धृतो भृतो महिमा
सर्वज्ञत्वं सर्वकर्तृत्वं च येन तत्. १७

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com